॥श्रीमद्वशिष्ठसंहितायां॥श्रीरामः॥

॥ श्रीरामचंद्रायनमः ॥ ... श्रीजानकीनाथायनमः॥ श्रीगणेशायनमः॥ भारद्वाजउवाच॥ ब्रह्म
पुत्रमहाभागब्रह्मर्षिकुलभूषण॥ ऐश्वर्य्यंरामचंद्रस्यत्वाभिन्त्वतःश्रुतंमया ॥१॥ इदानींश्रोतुमिच्छामिराम
स्यबालकौतुकम्॥ ब्रह्मविस्मयहेत्वादिध्येयस्यपरमात्मनः ॥२॥ श्रीवसिष्ठउवाच॥ शृणुतांमुनिशा
र्दूलगुह्यादगुह्यतमंमहत्॥ रहस्यंकथयिष्यामिवेदानांहृदयंपरं॥३॥ एकदाप्रातरुत्थायपर्यंकवर्य्येशिरोम
णिः॥ श्रीमद्दशरथोराजावात्सल्यरसवारिधिः॥४॥ दिव्यैर्नानाविधैरत्नैर्निर्मितेषुमनोहरे॥ कौशिल्याम
दिरेनित्यंरराजांतःपुरेप्रभुः॥५॥ विचित्रैर्मणिभिस्तत्रनिर्मितेषुमहांगणे॥ कोमलेसासनेचित्रेस्युपधानैर
लंकृते॥६॥ संस्थितःश्रीमहाराजःकौशिल्याचैवसंस्थिता॥ बालानांकौतुकंदृष्ट्वाप्रेमसिंधौममज्जतुः॥७
॥ श्रीरामोलक्ष्मणश्चैवशत्रुघ्नोभरतस्तथा॥ अंगणेबालकाःसर्वेचक्रुर्लीलांमनोहराम्॥८॥ श्यामहेम
ग्पालकाबद्धवेणिभिःपरिशोभिताः ... पीतांबराःश्यामगौरांगविलसत्प्रभाः॥९॥ पंकजायतनेत्रै
श्चुस्यंजनेनसुरंजिताः॥ मातृभिर्य्यत्रमंत्रैश्चरक्षिताश्यामबिंदुभिः॥१०॥ उत्तुंगविलसन्नासापुटचंचलमौ
क्तिकाः॥ किंकिणीनूपुराणावमुखरीकृतदिग्मुखाः॥११॥ दिव्यमालांगणाश्चबालालंकारभूषिताः॥ पर

स्पर्शीयमाणामातृवात्सल्यलालिताः ॥ १२ ॥ स्वदंतोमोदकान्भूपान्स्वंगणोमणिचित्रिते
नोधावंतोगृहणापच ॥ १३ ॥ उच्चैःकिलकिलाशब्दंकृतवंतोमुहुःक्वचित् ॥ मयूरैःकोकिलैःसार्द्धंकूजंतोमधु
रंक्वचित् ॥ १४ ॥ द्विपंलोकंदुकान्दूरं [illegible] ऊर्द्धदृष्टयः ॥ गणांतोधावमानाश्चवादयंतश्चनूपुरान् ॥ १५
लीलांनेत्रपिधानाख्यांचक्रुस्तेक[illegible]क्वचित् ॥ कंदुकाख्यांतथालीलांवाहुयुद्धंक्वपांक्वचित् ॥ १६ ॥ ए
वंनानाविधाःक्रीडाःकृतवास्तुमहस्तुचकौशल्यालेंद्रकुमारेषुतदावहलादयःसुराः ॥ १७ ॥ आकाशेदिव्यपुष्पा
णांचक्रुर्वृष्टिमनुत्तमां ॥ अविछिन्नावदंतश्चजययुग्ममुहुर्मुहुः ॥ १८ ॥ तस्मिन्पुष्पचयेदिव्येपतितेचपत
त्पति ॥ रेमुस्तेवालकाःसर्वेमहाराजस्यपश्यतः ॥ १९ ॥ धावंतश्चपतंतश्चपुनरुत्थायपस्वेच्छया ॥ गच्छंत
श्चहसंतश्चलुठंतश्चपुनक्वचित् ॥ २० ॥ एवंक्रीडारसासक्तान्पुत्रान्दृष्ट्वामुदान्वितः ॥ आरूपामासराजेंद्रःकौ
शल्याचपुनपुनः ॥ २१ ॥ श्रीरामागच्छभद्रंतेभरतागम्यतांत्वया ॥ एहित्वंवत्ससौमित्रेशत्रुघ्नागच्छपुत्रक
२२ ॥ राज्ञःसामीप्यमागम्यचलचित्ताश्चवालकाः ॥ पुनःकिलकिलाशब्दंकृतवंतोद्रुतंगताः ॥ २३ ॥ आकारिता
महिंद्रेणवालकानागमन्पुतः ॥ स्वयमुत्थायकौशल्यागृहणायर्ययौतदा ॥ २४ ॥ वात्सल्यनिर्भरानंदमग्नानंद

गतिः सतीं इतस्ततो महाराज्ञी गच्छंती स्वंगरोव भौ २५ रोमांचितास्तु गौरांगी प्रस्विन्नमुखपंकजा दुग्धं स्तनाभ्यां सुस्रा
वनेन्नानंदजलप्लुताः २६ गृहीतुकामां कौशल्यां चंचलास्ते कुमारकाः धावंतो लाघवाज्ज्ञात्वा न जग्मुर्ग्रहणं
तदा २७ सुमित्रापि महाभाग्या सा [illegible] च्चैः सर्वांगसुंदरी कुमारग्रहणार्थाय सुतस्थौ गजगामिनी २८ अन्याश्च
पि महाराजयोषितो रामातरः ग्रहणार्थं कुमाराणाम् उत्तस्थुः पुत्रवत्सलाः २९ तदापि मधुरं शब्दं किंकिणीनूपुरोद्भवम्
मातॄणां च कुमाराणां नादयन्मन्दिरं बभौ ३० रामादयः कुमारास्ते महीला मातृभिर्हठात् मोचयित्वा स्वकान् हस्ता-
ल्लाघवाद्दुद्रुवुस्तदा ३१ श्रमेण मातरस्तत्र जगृहुर्धावितास्तु तान् रुदंतो मातृहस्तेभ्यो मुक्ताः सर्वे पुनर्गताः ३२ मातृ
दृष्ट्वा महात्मानो स्वेदसिक्तकलेवराः स्वात्मानं ग्राहयामासुः कृपया मातृवल्लभाः ३३ कैकेयी रामचंद्रं च सुमित्रा भरतं
तथा कौशल्या हस्तयो र्धृत्वा शत्रुघ्नलक्ष्मणौ ययौ ३४ मृदुहस्ततलैर्बाला सौमित्री मातरं मुहुः ताडयंतो रुदंतो
च मनोगतुं न वक्तुं ३५ आगच्छ [illegible] ष्यास पुत्रा प्राणवल्लभाः आनंदं प्राप्तवान् राजा वाक्स्वनोभ्यामगो
चरं ३६ मधुरान्स्तु कुमाराणां कुमारान् कलभाषिणः राज्ञः प्राणप्रियान् सर्वान् क्रीडाकल्लोलवारिधीन् ३७
पुत्रानादाय हस्तेषु राजराजेंद्रसन्निधिम् आजग्मुर्यतः कृत्वा कौशल्या राजयोषिताः ३८ आगम्य श्रीमहाराज

समीपंप्रमदोत्तमाः॥ पुत्रान्संस्थापयामासराजांकेपरयामुदा॥ ३९॥ कुमारानागतान्दृष्ट्वाकौशलेंद्रोमहाद्युतिः॥ कौ
शल्याद्याःप्रियाश्चैवपरानंदपरिप्लुता॥ ४०॥ वामजंघेतुशत्रुघ्नंदक्षिणेभरतंतथा॥ अपरोपयत्तदारामंमध्यांकेपु
त्रवत्सला॥ ४१॥ चंचलत्वाददतिस्नेहाद्बाल्[illegible]भूतपतेः॥ ग्रीवामारुह्यसौमित्रिरकंपयच्छिरोमुहुः॥ ४२॥ चार
लयंश्चरणौस्निग्धौदिव्यचिन्हैरलंकृतौ॥ चंचच्चन्द्रनखज्योत्स्नप्रकाशीकृतदिग्मुखौ॥ ४३॥ मुखरैरत्नमंजीरैवि
भ्रारौणोपप्यसन्तिभौ॥राजपुत्रंप्रियंकंचिदागच्छेतिब्रुवन्मुहुः॥ ४४॥ चुचुंबरामचंद्रस्यपूर्णचंद्राननंमुहुः॥ भर
तस्यमहाराजःशत्रुघ्नस्यमनोहरम्॥ ४५॥ कोमलौलक्ष्मणस्यापिचुचुंबचरणौमुहुः॥ निधायहृदयराजा
ममज्जप्रेमवारिधौ॥ ४६॥ दक्षिणाभुजमुत्थाप्यप्रेमणायत्तनत्रांकपा॥ पृष्ठेधृत्वाचसौमित्रिंपार्थिवःप्रमु
मोदहः॥ ४७॥ वामहस्तंतुरामस्यस्वाध्यायभूपतिः॥ मुखचंद्रात्कुमाराणामपश्यत्प्रमदावृतः॥ ४८॥ मू
र्ध्नस्वाघ्रायपुत्रांश्चपरिष्वज्यमहीपतिः॥ स्नावयामासनेत्राभ्यांप्रेमानंदोद्भवंजलं॥ ४९॥ कुमारदर्शनालाप
चुंबनैर्वसुधाधिपः॥ परिष्वंगेनरोमांचस्तब्धदेहिंद्धिमानसः॥ ५०॥ नविवेदतदाकिंचित्स्वीयंपारक्यमेवच
स्वात्मानंकेवलंप्रेमपरानंदस्वरूपधृक्॥ ५१॥ कौशल्याद्याःस्थितास्तत्रसमंताद्राजयोषितः॥ राजानंपुत्र

त्सल्यपरानंदस्वरूपिणम् ५२ दृष्ट्वाधन्यावयंसर्वाहिस्वसारःपरस्परम् इत्युक्त्वाचयथाराजातावभ्युवुत्त
स्थेवहि ५३ विमानैरागतादृष्टुमैयोध्यायांमहोत्सवम् ब्रह्मेंद्रप्रमुखादेवारुद्रादित्यमरुद्गणाः ५४
सर्वेलोकपालाश्चगंधर्वाश्चाप्सरोगणाः अश्विनौचाचरणाःसिद्धासाध्याकिन्नरगुह्यकाः ५५ ग्रह
नक्षत्रयक्षाश्चविद्याधरमहोरगाः सनकाद्याश्चयोगींद्रानारदाद्यामहर्षयः ५६ आकाशेसंस्थितास्त
वैदृष्ट्वायोध्यापतिंप्रभुं पुत्रैःसहमहाराजंप्रियाभिःपरिवारितं ५७ कुर्वंतोदिव्यपुष्पाणांवृष्टिंविच्छेदव
र्जितं वदंतोजयशब्दांश्चवादयंतश्चदुंदुभीन् ५८ जयश्रीराजराजेंद्रश्रीमद्दशरथप्रभो॥ रघुराजकुलांभो
धिचंद्रसर्वजनप्रिय ५९ कौशल्येश्रीमहाराज्ञीजयत्वंपुत्रवत्सले रत्नगर्भेसुमित्रेत्वंजयसाध्वीपतिव
ते ६० कैकेयित्वंमहाभागेजयभक्तार्त्तिनाशिनी जायतःश्रीम[हा]राजप्रियाःसर्वामहो[द]याः ६१ ज
यश्रीमन्महाराजकुमाररघुनंदन रामचं[द्र]म[हा]बाहोसच्चिदानंदविग्रह ६२ गुणातीतपरंब्रह्मपरात्परतम
प्रभो वात्सल्यादिपरानंदकल्याणगुणसागर ६३ जयमत्स्याद्यसंख्येयावतारोद्भवकारण ब्रह्मवि
ष्णुमहेशादिसंसेव्यचरणांबुज ६४ जयश्रीकोशल्याधीशचातकानंददायक अयोध्याब्धिमहाचं

द्रकोशिल्पाश्रुतिः मुक्तिकः ॥ ६५ ॥ जयत्वंरूपसौंदर्यलावण्यामृतवारिधे । घोरसंसारदावाग्निसंतप्ताभयकारक
॥ ६६ ॥ राघवेंद्रमहाराजपुत्ररत्नमहाद्युते ॥ सौमित्रेमान्नवात्सल्यसिंधुचंद्रजयप्रभो ॥ ६७ ॥ रामप्राणमनःपद्मिरत्न
पंजरलक्ष्मण ॥ जयासंख्येयसौंदर्य ... त्यादिगुणार्णव ॥ ६८ ॥ जयानंतधराधारशेषकारणविग्रह कोटि
कंदर्पदर्पघ्नसच्चिदानंदरूपक ॥ ६९ ॥ जयश्रीरामराजेंद्रभाग्यभूल्लोकभूषण ॥ भरतानंतमाधुर्यपरमा
नंदविग्रह ॥ ७० ॥ जयश्रीरामपादाब्जभ्रमरभ्रातृवात्सल्य ॥ गांभीर्यौदार्यसौशील्यवात्सल्यादिगुणांबुधे ॥ ७१ ॥
सुमित्राब्धिमहाचंद्रशत्रुघ्नभ्रातृभूषण ॥ जयश्रीलक्ष्मणाग्रियगूढवात्सल्यविग्रह ॥ ७२ ॥ राजेंद्रहृदयांभो
जमार्तंडमधुरद्युते ॥ जयत्वंसच्चिदानंदस्वरूपगुणमंदिर ॥ ७३ ॥ अयोध्येविमलेरम्येसच्चिदानंदरूपिणि ॥ ज
यश्रीविस्तृतलेशाध्यानागम्यपरावरे ॥ ७४ ॥ हरिनेत्रोद्भवेनित्येचिन्मयानंदविग्रहे ॥ त्वत्तीरेग्वसतांदेविपि
वतांस्त्वज्जलंसकृत् ॥ ७५ ॥ ददासिरामचंद्रस्यस्वरूपंपरात्परम् ॥ जयश्रीराममूर्तेश्रीसरयूत्वंसरिद्वरे ॥ ७६ ॥
इक्ष्वाकुवंशसंभूतारघुराजकुलोद्भवाः ॥ धनुर्वेदविदांश्रेष्ठाः सत्यधर्मैकविग्रहाः ॥ ७७ ॥ वीराःसर्वेवदान्या
श्चपरदारपराङ्मुखाः ॥ यशसानिर्मलेनैवधवलीकृतदिग्मुखाः ॥ ७८ ॥ शरण्याःसर्वभूतानांप्रजारक्षणतत्प

राः वेदवेदांगसारज्ञाः सुशीलाः सत्यसंगराः ७९ प्रज्ञयाग्निदुराधर्षाः शत्रुसंहारकारिकाः शास्त्रास्त्रबलसंप
न्नाः सर्वविद्याधु[illegible]रंधुराः ८० धीरोदात्तगुणसंपन्ना राजशास्त्रविदुत्तमाः गांभीर्यादिगुणैः पूर्णाः सर्व
भूतप्रियंवदाः ८१ चक्रवर्तिशिरोरत्नाः सर्वदिग्विजयोद्यताः देवासुरमनुष्येंद्रमौलिराजितांघ्रिकाः ८२
सर्वेयोध्यासरःपद्माः श्रीरामार्कप्रबोधिताः जयंति श्रीमहाराजरंगपादाब्जसेविकाः ८३ समानवयस
स्सर्वे रूपशीलगुणान्विताः नित्यलीलासखायश्च श्रीरामप्राणवल्लभाः ८४ दासाश्चैवं तथा सर्वे
नित्यानंदैकविग्रहाः जयंति प्रभवः सर्वे तथायोध्यानिवासिनः ८५ इत्येवं भाषमाणाश्च देवाब्र
ह्मशिवादयः ब्रह्मानंदं तु धिक्कृत्य परं योगिदुर्लभम् ८६ निनिंदुस्ते स्वमात्मानं स्वस्वलोकसुखा
नि च शशंसुर्महीपालं सुपुत्रं कोशलेश्वरं ८७ रघुवंशांबुजादित्यो धन्यो दशरथः स्वराट् कौशल्या
द्यास्तथा सर्वा धन्या राजेंद्रयोषितः ८८ धन्यायोध्यापुरी नित्या धन्या श्रीसरयूसरित् धन्यास्सर्वे
महाभागास्तथायोध्यानिवाशिनः ८९ रामादीनां कुमाराणां वात्सल्यानंदउत्तमाः पादस्पोभुजपतेरा
ज्ञा श्रीश्रीमद्दशरथेन च ९० कौशल्याप्रमुखाभिश्च तथायोध्यानिवासिभिः कुत्रचित्तादृशो नास्ति

नभूतोनभविष्यति ॥ ९१ ॥ वैकुंठपरमाकाशेनित्यमुक्तैकसेविते नैवनैवायमानंदोगोलोकेपिपरा
त्परे ॥ ९२ ॥ अस्माभिभोग्याहीनैश्चविर्यायारात्तमानसैः अयोध्यावासिनांयद्वैतत्सुखंप्राप्यतेकथं ॥ ९३ ॥
अथस्माकमयोध्यायाःपशुपक्षिमृगादिषु मनुष्येष्वपिवावृक्षतृणगुल्मलतादिषु ॥ ९४ ॥ भवेज्जन्मतदाश्री
द्रामपादाब्जरेणुभिः ॥ पूतात्मानोवयंसर्वेकृतकृत्याभवेमहि ॥ ९५ ॥ एवंपरस्परंवाक्यमुक्त्वाब्रह्मादयःसुराः रामचं
भीतिसंपन्नाःस्वस्वकार्य्यपरस्वयंयुः ॥ ९६ ॥ इतितेवर्णितानित्या भ्रातृभिःसखिभिःसह मुनेश्रीरामचंद्रस्यलीलावा
त्सल्यवर्द्धिनी ॥ ९७ ॥ सर्वधाम्नांपरानित्यातिरस्कृत्यगरोत्तया अयोध्याराजतेसच्चित्सांद्रानंदस्वरूपिणी ॥ ९८ ॥
दिव्यरत्नमयैरुच्चैरसंख्यैर्येर्महाधनैः ॥ चित्रध्वजपताकैश्चप्रासादैःपरमायते ॥ ९९ ॥ उच्चैःश्रवःसमैरश्वैर्मातंगैश्
चमदोत्कटैः ॥ उच्चैरैरावतप्रख्यैर्जंगमैःपर्वतैरिव ॥ १०० ॥ रथैर्नानायुधैश्चित्रैरत्नहाटकमंडितैः जनजानैरनैकै
श्चविमानैरत्नभूषितैः ॥ १०१ ॥ वीणावेणुमृदंगैर्गोमुखैर्दुंदुभीपणवैस्तथा ॥ वाद्यैश्चान्यैर्विविधैर्नित्यैः काणचित्तापकर्ष
कैः ॥ १०२ ॥ नारनारीगणैर्नित्यैःसच्चिदानंदविग्रहैः ॥ कंदर्परतिदर्पघ्नैःसंकुलाभ्राजतेपुरी ॥ १०३ ॥ अयोध्याप
रितःसप्तदुर्गाणिमुनिपुंगव ॥ स्वर्णस्फटिकमाणिक्यचित्ररत्नमयानिच ॥ १०४ ॥ फुल्लपंकजतोयाभिःपरिखा
भिःसमंततः ॥ वेष्टितान्यप्रधृष्याणिभांतियंत्रायुधानिच ॥ १०५ ॥ पश्चिमेचोत्तरेभागेपूर्वेपुण्यासरिद्वराम् वहतीश्च ॥

मतीनित्यासरयूर्लोकपावनि ॥१०६॥ तस्यांघट्टान्यनेकानिदिव्यस्वर्णमयानिच विचित्ररत्नवज्राणिराजंतेकूल
योर्द्वयोः १०७ वज्रवैडूर्यमाणिक्यमुक्ताचूर्णमयंमहत् ॥ विस्तृतंकोमलंभातिसरय्वापुलिनेमुने ॥१०८॥ विचित्र
पक्षिगणास्तत्रयुग्मभूताःसहस्रशः क्रीडंतोनिर्भयानित्याःकूजंतोमधुरंमुहुः ॥१०९॥ जितचंद्रसुधाक्षीरंकंबुकुंदहिम
प्रभं हंसचंद्रमणिश्रीमन्मधुरंभातितज्जलम् ॥११०॥ श्रेणयस्तत्रराजंतिपंकजानांचतुर्विधाः फुल्लानांयत्रकूं
जंतिषट्पदामधुरंस्वरम् ॥१११॥ चिंतामणिमयीनित्याचतुर्विंशतियोजना परितोभात्ययोध्यायाःभूमिःसच्चिन्म
यीमहः ॥११२॥ तत्रनित्यान्यनेकानिवनान्युपवनानिच ॥ भ्रमरैःपक्षिभिश्चैवसंप्रष्टानिसमंततः ॥११३॥ चित्रपु
ष्पफलैर्वृक्षैर्लताभिःपरिवेष्टितैः विचित्रमणिवज्राभिर्वेदिकाभिरलंकृतैः ॥११४॥ दिव्यैर्नानाविधैर्नित्यकिशो
रैर्नवपल्लवैः ॥ संकुलानिविराजंतेसर्वभोगयुतानिच ॥११५॥ क्रीडार्थेगिरयस्तत्रभांतिरत्नगृहाणिच वापीकुंडत
डागानिरत्नसोपानवंतिच ॥११६॥ [illegible] निर्मलतोयानिप्रफुल्लकमलानिच ॥ गुंजन्मधुव्रतश्रेणिमुखराणिमु
नीश्वर ॥११७॥ यत्रगुल्मलतावृक्षपत्रपुष्पफलादिकम् ॥ यत्किंचित्पक्षिभृंगादितत्सर्वंभातिचिन्मयम् ॥११८॥
नित्याऐक्ष्वाकवःसर्वेनित्याःपृथुकुलोद्भवाः ॥ नित्योहंमुनयोनित्याःसर्वेचमंत्रिणः ॥११९॥ स्वयोध्यावासिनोनि
त्याब्राह्मणाप्रमुखास्तथा ॥ नित्याभृत्याश्चदासाश्चश्रीराजकुलसेवकाः ॥१२०॥ कौशल्याश्रीमतीनित्यानित्योदशः

रथोन्नपः कैकेयीचसुमित्राद्यानित्याश्रीराजयोषिताः १२१ श्रीरामोलक्ष्मणश्चैवशत्रुघ्नोभरतस्तथा नित्यार
घुकुलोद्भवानित्याःसर्वेकुमारकाः १२२ नित्यंदशर थास्यांकेस्थितस्यपरमात्मनः क्रीडितोरामचंद्रस्ययाव्या
तिलक्ष्मणाग्रभो १२३ तावद्ब्रह्ममहेशाद्याःसंत्वाब्रह्मांडकोटयः कटाक्षपाद्रामचंद्रस्यलयंयांत्युद्भवंतिच १२४
रामस्यनामरूपंचलीलाधामपरात्परं एतच्चतुष्टयंनित्यंसच्चिदानंदविग्रहं १२५ इतितेवर्णितंविप्रगु
ह्याद्गुह्यसनातनं रहस्यंवेदवेदांगसारात्सारंसुदुर्लभं १२६ नवक्तव्यंनवक्तव्यंनवक्तव्यमिदंत्वया रामभ
क्तिविहीनायनास्तिकायविशेषतः १२७ वक्तव्यंरामभक्तायसर्वभूतहितायच शुद्धात्मनेप्रशांतायगुरुभ
क्तिरतायच १२८ शालिग्रामसमीपेचतुलसीसन्निधौमुने शिवालयेनदीतीरेश्रीविष्णुमंदिरेनरः १२९ प
वैकुंठस्थितोवापि[illegible]न्यासमाहितः पठेद्वाशृणुयाद्वापिरहस्यमिदमुत्तमम् १३० सतीर्त्वादुस्तरांमा
यांघोररूपंभायावहाम् ययोध्याख्यंपरंधामप्राप्नुयान्नात्रसंशयः १३१ नयत्रशोकोनजरानमृत्युर्नका
लमायाप्रलयादिविभ्रमः रमेतरामेणसतत्रगत्वास्वरूपतांप्राप्यचिरंनिरंजने १३२ ततोभरद्वाजउ
वाच हर्षितोमुनीश्वरंगद्गदयागिरावचः धन्योस्मियत्वन्मुखनिर्गतांसुधापिवामितेपद्मपदंनमाम्यहं १३३
नमाम्ययोध्यांसरयूंसरिद्वरां नमामिरंगंरघुवंशमीश्वरम् स्वजाब्धिचंद्रंनृपवर्यभूषणंनपस्यसर्वामहि

पीनेमाम्पहम ॥१२४॥ नमामिरामंरघुवंशभूषणंनमामिसौमित्रिमतीवसुंदरं ॥ नमामिश्रीमन्दरातंकृपानिधिं
नमामिशत्रुघ्नमुदारदर्शनम् ॥१२५॥ इति श्रीमत्पांश्रीम[illegible]ण्यास्य[illegible]ताया श्री[illegible]ह म्यभूषणे श्रीम
द्वशिष्टभरद्वाजसंवादे श्रीमद्रामबालचरित्रवर्णनंनामसप्तविंशतितमोध्यायः ॥२७॥ इदंरामचरित्रं
माघमासेशुक्लपक्षेतिथौपूर्णिमायांसोमवारे लिखितं डाकोर[illegible]मध्ये लिखितंपीवेल
वहातंगरीव पठना । थैवैष्णवश्रीरघुनाथदासपुजारीजी ॥ [illegible] ॥ समाप्त ॥ श्रीरामोजयति ॥